# Rajakrita Shankarat Varayachana

# રાજાકૃતા શઙ્કરાત્ વરયાચના

## Document Information

Text title : Rajakrita Shankarat Varayachana

File name : rAjAkRRitAshankarAtvarayAchanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 21| 210-257||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# રાજાકૃતા શઙ્કરાત્ વરયાચના

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
આદિવિષ્ણુર્ભવાન્પૂર્વં યસ્માજ્જાતો મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૦॥

યતશ્ચતુર્મુખો જાતો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૧॥

યસ્માદિન્દ્રાદયો જાતા દિક્પાલાઃ શ્રીમહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૨॥

વેદા યસ્માત્સમુત્પન્ના દેવદેવાન્મહેશ્વરાત્ ।
(યસ્ય નિઃશ્વસિતં વેદા દેવદેવસ્ય શૂલિનઃ ।)
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૩॥

યસ્માત્સૂર્યઃ સમુત્પન્નો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૪॥

યસ્માચ્ચન્દ્રઃ સમુત્પન્નો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૫॥

યસ્માદજાયતાકાશો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૬॥

યસ્માદ્વાયુઃ સમુત્પન્નો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૭॥

યસ્માદગ્નિઃ સમુત્પન્નો દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૮॥

યસ્માદાપઃ સમુત્પન્ના દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૧૯॥

યસ્માત્ક્ષોણી સમુત્પન્ના દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૦॥

યસ્માદેષધયો જાતા દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૧॥

યસ્માદન્નં સમુત્પન્નં દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૨॥

યસ્માદ્દ્વીપાઃ સમુત્પન્ના દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૩॥

યસ્માદ્દ્વિપાદઃ સમ્ભૂતા દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૪॥

યસ્માચ્ચતુષ્પદા જાતા દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૫॥

યસ્માદષ્ટપદા જાતા દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૬॥

યસ્માદ્વનાનિ જાતાનિ દેવદેવાન્મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૭॥

યસ્માદ્ગિરિવરા જાતા દેવદેવાન્મહેશ્વાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૮॥

યસ્યાન્તં ન વિદુર્દેવા ભવદાદ્યાઃ પિનાકિનઃ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૨૯॥

યસ્ય સ્વરૂપં ન જ્ઞાતં સર્વથા ભવદાદિભિઃ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૦॥

યત્પ્રસાદેન વિષ્ણુત્વં ત્વયા પ્રાપ્તં પુરા હરે ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૧॥

બ્રહ્મત્વં બ્રહ્મણા પ્રાપ્તં યત્પ્રસાદાત્પુરા હરે ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૨॥

ઇન્દ્રત્વં પ્રાપ્તમિન્દ્રેણ યત્પ્રસાદાત્પુરા હરે ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૩॥

વાત્યયં વાયુરનિશં યસ્માદ્ભીતો મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૪॥

સૂર્યોઽપ્યહરહો નિત્યં યસ્માદ્ભીતો મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૫॥

ઉદેતિ વહ્નિશ્ચન્દ્રશ્ચ યસ્માદ્ભીતો મહેશ્વરાત્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૬॥

યદ્ભક્તૈર્ભેદિતાઃ શૈલા મન્દરપ્રમુખાઃ પુરા ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૭॥

યદ્ભક્તૈઃ ક્ષણમાત્રેણ સમુદ્રાશ્ચલુકીકૃતાઃ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૮॥

યદ્ભક્તૈઃ ક્ષણમાત્રેણ લોકા વ્યત્યયિતાઃ પુરા ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૩૯॥

તૃણીકૃતોઽસિ યદ્ભક્તૈસ્ત્વમેવ ગરુડધ્વજ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૦॥

તૃણીકૃતશ્ચતુર્વક્ત્રો યદ્ભક્તૈર્હંસવાહનઃ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૧॥

તૃણીકૃતઃ શચીનાથો યદ્ભક્તૈઃ સ્વર્ગનાયકઃ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૨॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૩॥

યદૃતં સત્પરં બ્રહ્મ પુરુષં કૃષ્ણમ્પિઙ્ગલમ્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૪॥

યદક્ષરં વિરૂપાક્ષમક્ષય્યફલદાયકમ્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૫॥

યદૂર્ધ્વરેતમનઘં વિશ્વરૂપમનામયમ્ ।
તસ્માદેવ વરં યાચે શઙ્કુરાલ્લોકશઙ્કુરાત્ ॥ ૨૪૬॥

યો નિર્ગુણો નિરાકારો નિરુપાધિર્નિરઞ્જનઃ ।

તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૪૭॥

યસ્સર્વવેદવેદાન્તપ્રતિપાદ્યો મહેશ્વરઃ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૪૮॥

યઃ સૃજત્યવતિ સ્વૈરં હન્તિ સર્વમિદં જગત્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૪૯॥

ત્વયા સ્વનેત્રપદ્મેન પૂજિતં યત્પદામ્બુજમ્ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૦॥

કન્દર્પદર્પં વ્યદલદ્યઃ સ્વનેત્રાગ્નિના હરઃ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૧॥

યો વ્યદારયદત્યુગ્રં નૃસિંહં શરભાકૃતિઃ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૨॥

કણ્ઠે દધાર યો હાલાહલં લોકરિરક્ષયા ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૩॥

મધુસૂદન યો દેવો મધુસૂદનસૂદનઃ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૪॥

યઃ સ્વભક્તૈકરક્ષાર્થં નિજઘાનાન્તકં પુરા ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૫॥

ન યસ્માત્પરમો દેવો યો જ્યાયાનણુરપ્યુત ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૬॥

યઃ સર્વદેવદેવેશો મહાદેવોઽખિલેશ્વરઃ ।
તસ્માદેવ વરં યાચે શઙ્કરાલ્લોકશઙ્કરાત્ ॥ ૨૫૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાકૃતા શઙ્કરાત્ વરયાચના ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૧। ૨૧૦-૨૫૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 21 . 210-257..

Proofread by Ruma Dewan

*Rajakrita Shankarat Varayachana*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*